नभस्तलं, पुं क्ली, ( नभसस्तलम् ।) गगनमण्डलम् । यथा, नैषधे । २ । ६६ ।

"तद्दुरीधितिधारया रयाद्-
गतया लोकविलोकनामसौ ।
छदहेमकषन्निवालसत्
कषपाषाणनिभे नभस्तले ॥"

नभस्यः, पुं, ( नभसे मेघाय साधुः । नभस् + "तत्र साधुः ।" ४ । ४ । ९८ । इति यत् । ) भाद्रमासः । इत्यमरः । १ । ४ । १७ ॥ ( यथा, हरिवंशे । १५२ । १ ।

"नभो नभस्येऽथ निरीक्ष्य मासि
कामस्तदा तोयदवृन्दकीर्णम् ॥" )

नभस्वान्, [ त् ] पुं, ( आकाशाद्वायुरिति श्रुतेः नभः उत्पत्तिकारणत्वेनास्त्यस्येति । नभस् + मतुप् मस्य वः । ) वायुः । इत्यमरः । १ । १ । ६६ ॥ ( यथा, रघुः । ४ । ८ ।

"स हि सर्व्वस्य लोकस्य युक्तदण्डतया मनः ।
आददे नातिशीतोष्णो नभस्वानिव दक्षिणः ॥")

नभाः, [ स् ] पुं, ( नभति हिनस्ति कीटादीनिति । नभ + "सर्व्वधातुभ्योऽसुन् ।" उणां ४ । १८८ । इति असुन् । ) श्रावणमासः । (यथा, रघुः । १२ । २९ ।

"स जहार तयोर्म्मध्ये मैथिलीं लोकशोषणः ।
नभोनभस्ययोर्वृष्टिमवग्रह इवान्तरे ॥" )

मेघः । घ्राणम् । वर्षाः । विसतन्तुः । पतद्ग्रहः । इति मेदिनी । से, २६ ॥ पलितशीर्षम् । इति धरणी ॥

नभाकं, क्ली, ( नभ्नाति व्याप्नोतीति । नभ + "पिनाकादयश्च ।" उणां । ४ । १५ । इति आकः । ) तमः । इत्युणादिकोषः ॥

नभोगजः, पुं, ( नभसि आकाशे गज इव । ) मेघः । इति त्रिकाण्डशेषः ॥

नभोगतिः, स्त्री, (नभसि गतिर्गमनम् ।) आकाशगमनम् । यथा,—

"प्रडीनोड्डीनसण्डीनडयनानि नभोगतौ ॥"
इति हेमचन्द्रः । ४ । ३८४ ॥

नभोदुहः, पुं, ( नभसः दोग्धि प्रपूरयति नद्यादिकमिति । दुह प्रपूरणे + कः । ) मेघः । इति शब्दमाला ॥

नभोद्वीपः, पुं, ( नभसि द्वीप इव । ) मेघः । इति शब्दमाला ॥

नभोधूमः, पुं, ( नभसि धूम इव । ) मेघः । इति शब्दमाला ॥

नभोनदी, स्त्री, ( नभसो नदी । ) स्वर्गङ्गा । इति भूरिप्रयोगः ॥

नभोमणिः, पुं, ( नभसो मणिरिव । ) सूर्य्यः । इति हेमचन्द्रः । २ । ८ ॥

नभोमण्डलदीपः, पुं, ( नभोमण्डले दीप इव । ) चन्द्रः । यथा, तिथ्यादितत्त्वे ।

"नभोमण्डलदीपाय शिरोरत्नाय धूर्ज्जटेः ।
कलाभिर्व्वर्द्धमानाय नमश्चन्द्राय चारवे ॥"

नभोम्बुपः, पुं, (नभसः अम्बु जलं पिबतीति । पा + कः । ) चातकपक्षी । इति हेमचन्द्रः । ४ । ३९५ ॥

नभोरजः, [ स् ] क्ली, ( नभसो रज इव । ) अन्धकारः । इति शब्दमाला ॥

नभोरेणुः, स्त्री, ( नभसि रेणुरिव । ) कुज्झटिका । इति त्रिकाण्डशेषः ॥

नभोलयः, पुं, ( नभसि लयो यस्य । ) धूमः । इति शब्दरत्नावली ॥

नभ्यं, त्रि, नभस इदमित्यर्थे ष्यञ्प्रत्ययः । नभसम्बन्धि । (नाभये हितम् । नाभि + "उगवादिभ्यो यत् ।" ५ । १ । २ । इति यत् । "नाभि नभञ्च ।" इति नभादेशः । रथाङ्गम् । "नभ्योऽक्षः । नभ्यमञ्जनम् । रथनाभावेवेदम् ॥" इति सिद्धान्तकौमुदी ॥ )

नभ्राट्, [ ज् ] पुं, ( न भ्राजते इति । भ्राज दीप्तौ + क्विप् । ) मेघः । इति हेमचन्द्रः । २ । ७८ ॥

नमः, [ स् ] व्य, (नम शब्दनत्योः + भावे असुन् । ) नतिः । इत्यमरः । ३ । ४ । १८ ॥ ( यथा, मार्कण्डेये ।

"नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥"

क्लीवलिङ्गेऽपि दृश्यते । यथा, भागवते । ३ । १३ । ४२ ।

"विधेम चास्यै नमसा सह त्वया
यस्यां स्वतेजोऽग्निमिवारणावधाः ॥")

त्यागः । वृतम् । इत्युणादिकोषः ॥ ( क्ली, अन्नम् । इति निघण्टुः । २ । ७ ॥ वज्रम् । इति निघण्टुः । २ । २० ॥ स्तोत्रम् । यथा, ऋग्वेदे । ७ । १६ । १ ।

"एना वो अग्निं नमसोर्जो नपातमा हुवे ॥")

नमतः, पुं, ( नम्यते इति । नम + "भृमृदृशि-यजीति ।" उणां । ३ । ११० । इति अतच् । ) प्रभुः । धूमः । नटः । इत्युणादिकोषः ॥

नमसः, पुं, ( नमतीति । नम + "अत्यविचमि-तमीति ।" उणां । ३ । ११७ । इति असच् । ) अनुकूलः । इत्युणादिकोषः ॥

नमसितः, त्रि, ( नमः कृतमिति । नमस् + "नमोवरिवः ।" ३ । १ । १९ । इति क्यच् । क्तः । "क्यस्य विभाषा ।" ६ । ४ । ५० । इति वा यलोपः । ) कृतनमस्कारः । पूजितः । तत्-पर्य्यायः । नमस्यितः २ अर्हितः ३ अपचायितः ४ अर्च्चितः ५ अपचितः ६ । इत्यमरः । ३ । १ । १०१ ॥

नमस्कारः, पुं, (नमः शब्दस्य कारः करणं यत्र ।) विषभेदः । इति शब्दचन्द्रिका ॥ ( नमः करणम् । नमस् + कृ + घञ् । ) नतिः । स च त्रिविधः । कायिकः वाचिकः मानसिकश्च । यथा,—

"कायिको वाग्भवश्चैव मानसस्त्रिविधः स्मृतः ।
नमस्कारस्तु तत्त्वज्ञैरुत्तमाधममध्यमः ॥"

कायिकादिरपि त्रिविधो यथा,—

"प्रसार्य्य पादौ हस्तौ च पतित्वा दण्डवत् क्षितौ ।
जानुभ्यां धरणीं गत्वा शिरसा स्पृश्य मेदिनीम् ॥
क्रियते यो नमस्कार उत्तमः कायिकस्तु सः ॥
जानुभ्याञ्च क्षितिं स्पृष्ट्वा शिरसा स्पृश्य मेदिनीम् ।
क्रियते यो नमस्कारो मध्यमः कायिकस्तु सः ॥
पुटीकृत्य करौ शीर्षे दीयते यद्यथा तथा ।
अस्पृष्ट्वा जानुशीर्षाभ्यां क्षितिं सोऽधम उच्यते ॥
या स्वयं गद्यपद्याभ्यां घटिताभ्यां नमस्कृतिः ।
क्रियते भक्तियुक्तैर्व्वा वाचिकस्तूत्तमः स्मृतः ॥
पौराणिकैर्व्वैदिकैर्व्वा मन्त्रैर्या क्रियते नतिः ।
मध्यमोऽसौ नमस्कारो भवेद्वाचनिकः सदा ॥
यत्तु मानुषवाक्येन नमनं क्रियते सदा ।
स वाचिकोऽधमो ज्ञेयो नमस्कारेषु पुत्रकौ ॥
इष्टमध्यानिष्टगतैर्म्मनोभिस्त्रिविधं पुनः ।
नमनं मानसं प्रोक्तमुत्तमाधममध्यमम् ॥
त्रिविधे च नमस्कारे कायिकश्चोत्तमः स्मृतः ।
कायिकैस्तु नमस्कारैर्देवास्तुष्यन्ति नित्यशः ॥
अयमेव नमस्कारो दण्डादिप्रतिपत्तिभिः ।
प्रणाम इति विज्ञेयः स पूर्व्वप्रतिपादितः ॥"

इति कालिकापुराणे ७० अध्यायः ॥ * ॥

रात्रौ तन्निषेधो यथा,—

"रात्रौ नैव नमस्कुर्य्यात्तेनाशीरभिचारिका ।
अतः प्रातःपदं दत्त्वा प्रयोक्तव्ये च ते उभे ॥"
इति महाभारतमिति केचित् ॥

नतिकरणम् । तत्तु करशिरःसंयोगादि । स्वापकर्षबोधकव्यापारविशेषः । इति मुग्धबोधटीकायां दुर्गादासः ॥

"सर्व्वै चापि नमस्कुर्य्युः सर्व्वावस्थासु सर्व्वदा ॥"

अभिवादयेदित्यनुवृत्तौ शङ्खः । नाप्रयतायाप्रयतश्च । इति शुद्धितत्त्वम् ॥

"स्त्रियो नमस्या वृद्धाश्च वयसा पत्युरेव ताः ॥"
इति स्मृत्यर्थसारः ॥ * ॥

"देवं विप्रं गुरुं दृष्ट्वा न नमेद्यस्तु सम्भ्रमात् ।
स कालसूत्रं व्रजति यावच्चन्द्रदिवाकरौ ॥
ब्राह्मणश्च गुरुं दृष्ट्वा न नमेद्यो नराधमः ।
यावज्जीवनपर्य्यन्तमशुचिर्य्यवनो भवेत् ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम् ॥

"देवतायतनं दृष्ट्वा दृष्ट्वा तु दण्डिनन्तथा ।
नमस्कारं न कुर्य्याद्यः प्रायश्चित्ती भवेन्नरः ॥
सभायां यज्ञशालायां देवतायतनेषु च ।
प्रत्येकन्तु नमस्कारो हन्ति पुण्यं पुराकृतम् ॥
उपविश्य नमेत् शूद्रो दीर्घायुर्ब्राह्मणो वदेत् ।
स शूद्रो नरकं याति ब्राह्मणो यात्यधोगतिम् ॥
दूरस्थं जलमध्यस्थं धावन्तं मदगर्व्वितम् ।
क्रोधवन्तं विजानीयात् नमस्कारञ्च वर्ज्जयेत् ॥
पुष्पहस्तो वारिहस्तस्तैलाभ्यङ्गी जलस्थितः ।
आशीःकर्त्ता नमस्कर्त्ता उभयोर्नरकं भवेत् ॥"
इति कर्म्मलोचनम् ॥ * ॥

"मातुः पितुः कनीयांसं न नमेद्वयसाधिकः ।
नमस्कुर्य्याद्गुरोः पत्नीं भ्रातृजायां विमातरम् ॥"
यमः ।

"अभिवादयतः पूर्व्वमाशिषं न प्रयच्छति ।
यद्दुष्कृतं भवेत्तस्य तस्माद्भागं प्रपद्यते ॥
स्वस्तीति ब्राह्मणे ब्रूयात् आयुष्मानिति राजनि ।
वर्द्धतामिति वैश्येषु शूद्रे त्वारोग्यमेव च ॥"
इति मलमासतत्त्वम् ॥ * ॥